॥अथसर्वप्रायश्चित्तप्रारंभः॥पत्र१०॥

श्रीगणेशायनमः॥अथसर्वप्रायश्चित्तंलिख्यते॥षड्वंत्र्यब्दंसार्धाब्दं
वायथाशक्तिदेवसुवर्णादिप्रत्याम्नायद्वाराकुर्यात्॥चतुरस्त्रीनेकंवाध्यात्मवि
दंपर्षत्वेनोप वेश्यकृतस्नानःशुक्लोसत्यं क्लिन्नवासाअभुंजानःपर्षदंप्रदक्षि
णीकृत्यहृदयेदूयमानोधरण्यांसाष्टांगंप्रणमेत्॥ततस्तैःकिंकार्यं॥मिथ्याभावा
दीःसत्यमेववदेत्यादिपृष्टेपर्षदग्रेगोवृषयोःप्रत्येकंप्रत्याम्नायत्वेनयथाशक्तिस्व
र्णरूप्ययोर्निष्कंतदर्धंतदर्धंवानिधायअमुकस्यमेजन्मप्रभृतिअद्ययावत्ज्ञाना
ज्ञानकामाकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभु

ते १

कृत

मध्येसंभावितानांपापानां २

क्तभुक्तपीतापीतसकलपानकानिपातकोपपातकलघुपातकसंकरीकर
णमलिनाकरणापात्रीकरणजातिभ्रंशकरणकीर्णक पातकानांनिरासार्थं
अनुग्रहंकृत्वाप्रायश्चित्तमुपदिशंतुभवंतः॥तथा॥सर्वेधर्मविवेक्तारोगोप्तारः
सकलाद्विजाः॥ममदेहस्यसंशुद्धिंकुर्वंतुद्विजसत्तमाः॥मयाकृतंमहाघोरंज्ञा
तमज्ञातकिल्बिषं॥प्रसादःक्रियतांमह्यंशुभानुज्ञांप्रयच्छथ॥पूज्यैःकृतःपवि
त्रोहंभवेयंद्विजसत्तमैः॥एवंप्रार्थयेत्॥पुत्रादिश्चेत्प्रायश्चित्तकर्त्तानदास्म
च्छब्दस्थानेतन्नामनिर्दिशेत्॥प्रार्थनानंतरंमामनुग्रहंकृतभवंतइतिप्रणमेत्॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ततस्तेनमुत्सार्यतस्यशरीरद्रव्यादिशक्तिमुत्तममध्यमादिपक्षांश्चविचार्यास्मि
न्पक्षेयंशक्तइतिनिश्चित्यपुस्तकवाचनपूर्वकंकथयेयुरनुवादकस्याग्रेप्रत्याम्ना
यांश्चशक्त्याकल्पयेयुः॥अस्मिन्काले प्रायश्चित्तीचंदनपुष्पादिभिःपुस्तकपूजां
सभ्यानुवादकपूजांविधायनिबंधपूजातेनचकिंचिद्यथाशक्तिद्रव्यंनिधायकृ
तोञ्जलिपुटोनम्रस्तिष्ठेत्॥अनुवादकायचयथापानुसारेण भृतिरूपांदक्षिणां
दद्यात्॥ततः पूर्वोक्त विघ्नोपणविघ्नेष्टानां महा
पातकव्यतिरिक्तानांपातकानांक्षयाय २
पर्षदुपदिष्टंसर्वप्रायश्चित्तंप्रत्याम्नायद्वाराप्राच्योदीच्यांगसहितंकुर्यात्॥ततो
नुवादकः॥अमुकस्यतवजन्मप्रभृति अद्ययावज्ज्ञानाज्ञानकामाकामसकृदसकृत्

कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातका
तिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रं
शकरप्रकीर्णकपातकानांमध्येसंभावितपातकानांनिरासार्थंअनेनपर्षदुपदिष्टेनसर्वप्रायश्चित्ते
प्रत्याम्नायद्वाराप्राच्योदीच्यांगसहितेनाचीर्णेनतवशुद्धिर्भविष्यति तेनत्वं नामुक
कृताधीभविष्यसीत्युपदिशेत्॥तच्चसर्वप्रायश्चित्तंशक्त्यनुसारेणषडब्दंसा च्यब्दं
र्धाब्दमन्यद्वापर्षदोनुमतंप्रत्याम्नायांश्चगायत्र्ययुतजपेतिलहोमसहस्रेद्वा
दशब्राह्मणभोजनेतीर्थेयोजनयात्रायांएकगोदानेसुवर्णरूप्यनिष्कतदर्धत
दर्धानांगोमूल्यानांशक्त्यादानेशुष्ककेशास्यद्वादशस्नानेषुद्विगुणद्वादशाभा
नादोचेकःप्राजापत्यइति॥तत्रशक्तआमान्नंद्विगुणंद्रव्यंचतुर्गुणमित्यादि
योज्यं॥निष्कश्चलोकशास्त्रयोरेकवाक्यतायांमाषाः॥४०॥तदर्धं२०तदर्धं१०

मुख्यं सुवर्णं तदभावे रजतं आद्यंतनो निवेदितं प्रायश्चित्तं भवानुग्रहइत्यं
गीकृत्य सन्मानपूर्वकं ब्राह्मणाय पर्यंतं विसर्जयेत्॥ अस्मिन्नहनि राज्ञो नोपवा
सः कार्यः॥ इतरेषां हविष्यान्नं॥ ततः कस्यांचिद्दिक्कायां नियोजितमाध्याह्नि
कः साधाङ्गे गंगादौ देशकालौ संकीर्त्य अमुकशर्मणो ममजन्मप्रभृति अद्यया
वत्कृताकृतकामाकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृ
ष्टास्पृष्टभुक्तोभुक्तपीतापीतसकलपानकानिपानकोपपानकलघुपानकसंक
रीकरणमलिनीकरणजातिभ्रंशकरप्रकीर्णपानकानांनिरासेनमरणकाले ३
अपात्रीकरण १ मध्येसंभावितपापानां १

शुध्यर्थं परमेश्वरप्रीत्यर्थं वामुकप्रायश्चित्तममुकप्रत्याम्नायेन प्राच्योदीच्यांग
सहितंयथाशक्तिकरिष्ये॥ इतिसंकल्प्य॥ यानिकानिचपापानिब्रह्महत्यासमा
निच॥ केशानाश्रित्यतिष्ठंतिनस्मश्रुकेशान्वपाम्यहं॥ इतिमंत्रेणशिरोवाक्षोपस्थ
वर्जं॥ नखरोमाणिवापयित्वा॥ आञ्जनेयोहादशांगुलदंतकाष्ठेन॥ आयुर्बलंयशो
वर्चः प्रजाःपशुवसूनिच॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते॥ इतिमंत्रेण
दंतान्शोध्यस्नात्वा॥ भस्मादिनास्नानंकुर्यात्॥ तत्रभस्मस्नानमेवं॥ ईशानाय
नमइतिशिरसि॥ तत्पुरुषायनमइतिमुखे॥ अघोरायनमइतिहृदये॥ वामदे

सर्वत्रा॰ ४

शिव

वायनमइतिगुह्ये॥सद्योजातायनमइतिपादयोः॥प्रणवेनसर्वांगे॥यद्वा॥अ
ग्निरितिभस्मआजलमितिभस्म॥स्थलमितिभस्म॥व्योमेतिभस्म॥सर्वंहवाइदं
भस्मेतिमंत्रैः॥एवंभस्मनास्नात्वागोमयेनस्नापयेत्॥गंधद्वारामितिगोमयं॥य
द्वा॥अयमग्रंचरंतीनामोषधीनांवनेवने॥तासामृषभपत्नीनांपवित्रंकायशो
धनं॥तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदेतिमंत्रेणगोमयेनस्नानं॥अथमृ

भस्मि

त्तिकास्नानं॥बल्मीकात्पर्वतानामितिप्रार्थयित्वा॥मावोरिषत्वन्विताइति
मंत्रेणखनित्वा॥स्योनापृथिविभवेतिमृदमादाय॥आर्यनेतेपुरायणेतिदूर्वा ४

मादाय॥गायत्र्यामृदमभ्युक्ष्यभूमोमृदंनिधाय॥आचम्य॥देशकालौस्मृत्वा
मृत्स्नानमहंकरिष्ये॥मृदंकुशोदकेनअभ्युक्षेत्॥ततोदिक्षुमृदंक्षिपेत्॥त्रातारं
मिंद्रमवितारमिंद्रं॰इतिपूर्वतः॥युमायुमधुमत्तमं॰इतिदक्षिणतः॥तत्त्वायामि
ब्रह्मणा॰इतिपश्चिमतः॥वयंसोमव्रतेतव॰इत्युत्तरतः॥तत्सूर्यंरोदसीउभे॰
इत्युपरिष्टात्॥अधःपश्यस्मोपरि॰इत्यधः॥ततोअंगेषु॥सुदस्त्रौषधीषु
रुद्रः॰इतिशिरसि॥अक्षीभ्यांतेनासिकाभ्यां॰इतिमुखे॥ग्रीवाभ्यस्तउष्णिहाभ्यः॰
इतिग्रीवायां॥औत्रेभ्यस्तेगुदाभ्यः॰इतिहृदये॥नाभानार्मिनऽआदंदे॰इतिनाभौ॥

LIBRARY OF THE BOMBAY BRANCH OF THE R. A. S. SOCIETY

५ त्वमिंद्रसुजोषसं०इतिबाह्वोः॥सोमानंस्वरणं०इतिकक्ष्योः॥यःकुक्षिःसोमपा
तमः०इतिकुक्ष्योः॥ब्रह्मोनांपितावृद्धरस्यपुत्रः०इतिपृष्ठे॥ऊरुभ्यांतेःअष्ठीव
द्भ्यां०इत्यूर्वोः॥मेढ्रंनाहनंकरणान्०इतिजान्वोः॥एतावानस्यमहिमा०॥इतिपा
दयोः॥यस्यविश्वानिहस्तयोः०इतिहस्तयोः॥अंगादंगाल्लोम्नोलोम्नः०अनेन
च पुरुषसूक्तेनसर्वांगे॥एतावत्यन्नाके॥अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंध
रे॥शिरसाधारयिष्यामिरक्षस्वमांपदेपदे॥भूमिर्धेनुर्धरणीलोकधारिणी॥
ऊढ्वतासिवराहेणकृष्णेनशतबाहुना॥मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं॥ ५

धरादेवी२

मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता॥मृत्तिकेदेहिमेनित्यंत्वयिसर्वंप्र
तिष्ठितं॥मृत्तिकेप्रतिष्ठितेसर्वंतन्मेनिर्णुदमृत्तिके॥त्वयादृतेनपापेनगच्छामि
परमांगतिं॥इतिमंत्रेणअंगोद्वर्तनं॥अश्वक्रांते०सतिलद्रूर्वांमृदंशिरसिनि
धाय॥मृत्तिकास्थानंप्रक्षाल्य॥तीर्थंप्रार्थयेत्॥हिरण्यशृंगंवरुणंप्रपद्येतीर्थं
मेदेहियाचितः॥यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः॥यन्मेमनसावाचा
कर्मणावादुष्कृतंकृतं॥तन्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनः॥
इमंमेगंगेयमुनेसरस्वति०॥इदंतेन्यामिरसंमानमृक्थ्याःकाभ्यासिंधुभ्रवदं

तिनुद्यः॥सुपेजीर्णामिवृत्वचुंजहातियापुंसस्त्रीरुस्कोभ्युपेत्य॥गंगागंगेति
योब्रूयात्०॥ततःसुमित्र्यानआपओषधयःसंतुदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वे
ष्टियंचवयंद्विष्मः॥समुद्रज्येष्ठाइतिचतसृभिः॥एतोन्विंद्रमितितिसृभिः॥त
रत्समंदीतिचसूक्तेनपावमानीभिः॥आपोहिष्ठेतितृचेनमार्जनंकृत्वा॥इमं
मेगंगेयुदकमालोडय॥ऋतंचसत्यमितितृचंजपन्अघमर्षणंकृत्वा॥ततः
मृत्ति प्रवाहाभिमुखस्त्रिवारंमज्जेत्॥इतिकास्नानं॥आपोहिष्ठेतितृचेनशुद्धोदके
स्नानंकुर्यात्॥अथपंचगव्यस्नानानि॥गायत्र्यागोमूत्रं॥गंधद्वारामितिगोमयं॥ ६

आप्यायस्वेतिपयसा॥दधिक्राव्णोइतिदध्ना॥घृतंमिमिक्षेतिघृतेन॥देवस्य
त्वेतिकुशोदकेन॥स्त्रीशूद्राणामंत्रकाणिस्नानानि॥एवंदशस्नानानिविधा
य॥अथस्नानांगतर्पणं॥ब्रह्मादयोयेदेवाः॥तांदेवांस्तर्पयामि॥भूर्देवांस्त०॥
भुवर्देवां०॥स्वर्देवां०॥भूर्भुवःस्वर्देवां०॥निवीती॥ऋषयेपायनादयोयेऋषयः॥
तान्ऋषींस्त०॥भूर्ऋषी०॥भुवर्ऋषी०॥स्वर्ऋषी०॥भूर्भुवःस्वर्ऋषी०॥प्राचीनावीती॥
सोमःपितृमान्यमोंगिरोग्नि ष्वात्ताग्निकव्यवाहनादयोयेपितरः॥तान्पितॄंस्त
र्पयामि॥भूःपितृं०॥भुवःपितृं०॥स्वःपितृं०॥भूर्भुवःस्वःपितृं०॥इतिस्नानांगत

र्पणंकृत्वा॥वाससीपरिधायद्विराचम्यविष्टरेदेवेनत्रिभ्योधिकान्युग्मान्ब्राह्मणा
न्भूजापूर्वकंभोजयेत्॥आमान्नंवादद्यात्॥इदमेवप्रायश्चित्तांगंविप्रुड्भ्राड्भमि
धीयते॥गवांमंगेषुतिष्ठंतिभुवनानिचतुर्दश॥यस्मान्नस्माच्छिवंमेस्यादिहलोके
परत्रचेतिमंत्रेणगोदानंप्रत्यक्षंनिष्क्रयद्वारावाकुर्यात्॥ततोग्निस्थापनादिपू
र्वकमाज्येनभूः।भुवः।स्वः।भूर्भुवः स्वः।इतिव्याहृतिभिःपापापूहाविष्टरेदे
नाष्टाविंशतिरष्टोत्तरशतंवाऽऽहुतीर्जुहुयात्॥ततःपंचगव्यंकार्यं॥सुवर्णादिपा
त्रेपद्मादिपात्रेवानाम्नाया॥गोमूत्रंत्रिपलंगायत्र्यामंत्रेण॥ॐइतिप्रणवेन ७

वादाय॥ततोगुग्ध्यार्धपरिमितंश्वेतायागोमयंगंधद्वारामित्यादाय॥ततःकपि
लायाःपयःसप्तपलमाप्यायस्वेत्यादाय॥ततोनीलायाःसप्तपलमेवदधिक्रा
व्णइतिआदाय॥ततःकृष्णायाःघृतमेकपलंघृतंमिमिक्षइत्यादाय॥ततः दधि
एकपलंकुशोदकमापोहिष्ठेत्यादाय॥प्रणवेनालोड्यप्रणवेनयज्ञियकाष्ठेन
निर्मथ्यप्रणवेनाभिमंत्र्यसप्तपलैर्हरितैःकुशैर्दशाऽऽहुतीर्जुहुयादभिमंत्रैःमंत्रा
श्च॥इरावतीधेनुमतीहिभूतंसूयवसिनीमनुषेदशस्या॥व्यस्फोरोदसीविष्ण
वेतेदाधर्थेपृथिवीमभितोमयूखैःस्वाहा॥पृथिव्याइदंइदंविष्णुर्विचक्रमेत्रे

धानिदंधेपदंसमूढमस्यपांसुरेस्वाहा॥विष्णवइदं।मानेस्तोकेतनयेस्वाहा।
रुद्रायेदं।ब्रह्मजज्ञानंप्रथमं।ब्रह्मणइदं।अग्नयेस्वाहा।अग्नयइदं।सोमायस्वा
हा।सोमायेदं।गायत्र्यास्तूर्यायस्वाहा।सूर्यायेदं।प्रणवेनप्रजापतयेस्वाहा।प्रजा
पतयइदं।भूर्भुवःस्वःस्वाहा।प्रजापत।अग्नयेस्विष्टकृतेस्वाहा।अग्नयेस्विष्ट
कृतइदं।व्रतयहणंकरिष्ये॥इतिद्विजानृपृष्ट्वातेःकुरुष्वेत्यनुज्ञातःप्रणवेनसर्व
पिबेत्॥एतच्चग्रामाद्बहिर्नयादेस्तीरेनक्षत्रदर्शनेकार्यं॥अत्रकोगोमृत्वादिस्व
रूपंवाच्यं॥सर्वस्यपेयत्वात्॥अस्मिन्दिनेउपवासःअशक्तस्यहविष्याशनं॥इ

तिपंचगव्यप्राशनं॥स्वगृहेआगत्यविप्रैःसहस्वजनैर्मित्रैर्बन्धुभिर्निमंत्रितैर्वाद्यप्रक्षालनंकृत्वा
श्चित्तंसंकल्पानुसारेणप्रत्याम्नायद्वारकृत्वाउत्तरांगानिकुर्यात्॥व्याहृतिभिराज्यंपू
र्ववद्धुत्वापूर्ववत्पुनःप्रायश्चित्तांगंविधिवदाहुत्वा॥ततोगोदानंपूर्ववच्चरेत्॥ एवंप्रा
यश्चित्तंकृत्वाशक्तोसत्यांदानान्यपिकुर्यात्॥तानिच॥गोभूतिलहिरण्याज्यवासोधा
न्यगुडानिच॥रौप्यंलवणमित्यष्टौदानानिप्रचक्षते॥इतिउक्तानि॥गावोमांगेषुतिष्ठं
ति॥गावोमेअग्रतःसंतु॥इतिगोर्दद्यात्॥सर्वभूताश्रयाभूमिर्विश्वंहरणसमुद्भवा॥
अनंतफलदात्वेवमतःशांतिंप्रयच्छमे॥इतिभूमिदानं॥महर्षेर्गोत्रसंभूताःकश्यपस्य

तिलास्मृताः॥तस्मादेषांप्रदानेनमेपापंव्यपोहतु॥इतितिलदानं॥हिरण्यगर्भगर्भस्थं
हेमवीजं०॥इतिहिरण्यदानं॥कामधेनुसमुद्भूतंसर्वक्रतुषुसंस्थितं॥देवानामाज्यमा
हारअतःशांतिंप्रयच्छमे॥इत्याज्यं॥शरणंसर्वलोकानांलज्जायारक्षणंपरं॥सुवे
षधारिवरत्वत्वमतःशांतिंप्रयच्छमे॥इतिवस्त्रं॥सर्वदेवमयंधान्यंसर्वेषांनिकरंमतं॥
प्राणिनांजीवनोपायमतःशांतिंप्रयच्छमे॥इतिधान्यं॥यथादेवेषुविश्वात्माप्रवरश्चज
नार्दनः॥सामवेदस्तुवेदानांमहादेवस्तुयोगिनां॥प्रणवःसर्वमंत्राणांनारीणांपार्वती
यथा॥तथारसानांप्रवरःसदैवेक्षुरसोमतः॥ममनस्मात्परंलक्ष्मीददस्वगुडसर्वदा॥ ९

इतिगुडदानं॥प्रीतिर्यतःपितॄणांचविष्णुशंकरयोःसदा॥शिवनेत्रोद्भवंरूप्यमतःशांतिं०॥
इतिरजतं॥यस्मात्परसःसर्वेनोल्लवणंविना॥शंभोःप्रीतिकरंनित्यमतःशां०॥इतिलव
णं॥एवंदशदानानि॥दत्वा॥मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर॥यन्मयाचरितंदेवपरि
पूर्णंतदस्तुमे॥इतिवदन्॥विष्णुंस्मरेत्॥एतानिदशदानानिसभ्येभ्यएवतदसंभवेन्येभ्यो
पितनः॥यन्मयाकृतमुकप्रायश्चित्तंतदछिद्रमस्तितिकर्त्रेक्तिअछिद्रमस्तितिब्राह्मणा
प्रतिब्रूयुः॥यद्वा॥व्रतछिद्रंतपश्छिद्रंयछिद्रंव्रतकर्मणि॥सर्वंभवतुमेछिद्रंयस्यचेछंति
वेद्विजाः॥ ॥इतिप्रतिवचनं॥ ॥इतिसर्वप्रायश्चित्तंसंपूर्णं॥ ॥शके १७०४ शुभकृन्नामसंवत्सरे॥ १०

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥इतिसर्वप्रायश्चित्तंसमाप्तं॥पत्र१०॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY